# শ্রীছিন্নমস্তাষ্টোত্তরশতনামস্তোত্রম্

{॥ শ্রীছিন্নমস্তাষ্টোত্তরশতনামস্তোত্রম্ ॥}

শ্রীপার্বত্যুবাচ --

নাম্নাং সহস্রমং পরমং ছিন্নমস্তা-প্রিযং শুভম্ ।

কথিতং ভবতা শম্ভো সদ্যঃ শত্রু-নিকৃন্তনম্ ॥ ১॥

পুনঃ পৃচ্ছাম্যহং দেব কৃপাং কুরু মমোপরি ।

সহস্র-নাম-পাঠে চ অশক্তো যঃ পুমান্ ভবেত্ ॥ ২॥

তেন কিং পঠ্যতে নাথ তন্মে ব্রূহি কৃপা-মযা ।

শ্রী সদাশিব উবাচ -

অষ্টোত্তর-শতং নাম্নাং পঠ্যতে তেন সর্বদা ॥ ৩॥

সহস্র্-নাম-পাঠস্য ফলং প্রাপ্নোতি নিশ্চিতম্ ।

ওঁ অস্য শ্রীছিন্নমস্তাষ্টোত্তর-শত-নাঅম-স্তোত্রস্য সদাশিব

ঋষিরনুষ্টুপ্ ছন্দঃ শ্রীছিন্নমস্তা দেবতা

মম-সকল-সিদ্ধি-প্রাপ্তযে জপে বিনিযোগঃ ॥

ওঁ ছিন্নমস্তা মহাবিদ্যা মহাভীমা মহোদরী ।

চণ্ডেশ্বরী চণ্ড-মাতা চণ্ড-মুণ্ড্-প্রভঞ্জিনী ॥ ৪॥

মহাচণ্ডা চণ্ড-রূপা চণ্ডিকা চণ্ড-খণ্ডিনী।

ক্রোধিনী ক্রোধ-জননী ক্রোধ-রূপা কুহূ কলা ॥ ৫॥

কোপাতুরা কোপযুতা জোপ-সম্হার-কারিণী।

বজ্র-বৈরোচনী বজ্রা বজ্র-কল্পা চ ডাকিনী ॥ ৬॥

ডাকিনী কর্ম্ম-নিরতা ডাকিনী কর্ম-পূজিতা।

ডাকিনী সঙ্গ-নিরতা ডাকিনী প্রেম-পূরিতা ॥ ৭॥

খট্বাঙ্গ-ধারিণী খর্বা খড্গ-খপ্পর-ধারিণী।

প্রেতাসনা প্রেত-যুতা প্রেত-সঙ্গ-বিহারিণী ॥ ৮॥

ছিন্ন-মুণ্ড-ধরা ছিন্ন-চণ্ড-বিদ্যা চ চিত্রিণী।

ঘোর-রূপা ঘোর-দৃষ্টর্ঘোর-রাবা ঘনোবরী ॥ ৯॥

যোগিনী যোগ-নিরতা জপ-যজ্ঞ-পরাযণা।

যোনি-চক্র-মযী যোনির্যোনি-চক্র-প্রবর্তিনী ॥ ১০॥

যোনি-মুদ্রা-যোনি-গম্যা যোনি-যন্ত্র-নিবাসিনী।

যন্ত্র-রূপা যন্ত্র-মযী যন্ত্রেশী যন্ত্র-পূজিতা ॥ ১১॥

কীর্ত্যা কর্পাদনী কালী কঙ্কালী কল-কারিণী।

আরক্তা রক্ত-নয়না রক্ত-পান-পরায়ণা ॥ ১২॥

ভবানী ভূতিদা ভূতির্ভূতি-দাত্রী চ ভৈরবী ।

ভৈরবাচার-নিরতা ভূত-ভৈরব-সেবিতা ॥ ১৩॥

ভীমা ভীমেশ্বরী দেবী ভীম-নাদ-পরায়ণা ।

ভবারাধ্যা ভব-নুতা ভব-সাগর-তারিণী ॥ ১৪॥

ভদ্র-কালী ভদ্র-তনুর্ভদ্র-রূপা চ ভদ্রিকা ।

ভদ্র-রূপা মহা-ভদ্রা সুভদ্রা ভদ্রপালিনী ॥ ১৫॥

সুভব্যা ভব্য-বদনা সুমুখী সিদ্ধ-সেবিতা ।

সিদ্ধিদা সিদ্ধি-নিবহা সিদ্ধাসিদ্ধ-নিষেবিতা ॥ ১৬॥

শুভদা শুভ্গা শুদ্ধা শুদ্ধ-সত্বা-শুভাবহা ।

শ্রেষ্ঠা দৃষ্ঠি-ময়ী দেবী দৃষ্ঠি-সম্হার-কারিণী ॥ ১৭॥

শর্বাণী সর্বগা সর্বা সর্ব-মঙ্গল-কারিণী ।

শিবা শান্তা শান্তি-রূপা মৃডানী মদানতুরা ॥ ১৮॥

ইতি তে কথিতং দেবি স্তোত্রং পরম-দুর্লভমং ।

গুহ্যাদ্-গুহ্য-তরং গোপ্যং গোপনিযং প্রযত্নতঃ ॥ ১৯॥

কিমত্র বহুনোক্তেন ত্বদগ্রং প্রাণ-বল্লভে ।

মারণং মোহনং দেবি হ্যুচ্চাটনমতঃ পরমং ॥ ২০॥

স্তম্ভনাদিক-কর্ম্মাণি ঋদ্ধয়ঃ সিদ্ধয়োঽপি চ ।

ত্রিকাল-পঠনাদস্য সর্বে সিধ্যন্ত্যসংশয়ঃ ॥ ২১॥

মহোত্তমং স্তোত্রমিদং বরাননে ময়েরিতং নিত্য মনন্য-বুদ্ধয়ঃ ।

পঠন্তি যে ভক্তি-যুতা নরোত্তমা ভবেন্ন তেষাং রিপুভিঃ পরাজয়ঃ ॥ ২২॥

॥ ইতি শ্রীছিন্নমস্তাষ্টোত্তরশতনাম স্তোত্রম্ ॥

Encoded and proofread by Mike Magee ac70@cityscape.co.uk

Last updated October 20 1998 for HTML version

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Chinnamasta Ashtottara Shatanama Stotram Lyrics in Bengali PDF
% File name : chinnama.itx
% Category : tantra
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion/tantram
% Transliterated by : Michael Magee ac70 at cityscape.co.uk

% Proofread by : Michael Magee ac70 at cityscape.co.uk
% Latest update : Dec. 22, 1997, Sept, 15, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website